# A-II/1/2410/ 22

## चतुर्थसत्रार्द्धम्

## प्रथमपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. शब्दः नित्यः उत क्षणिकः?
2. शब्दार्थयोः सम्बन्धः कः?
3. शब्दः केन सह नित्यसम्बद्धः?
4. प्रयत्नानन्तरदर्शनात् शब्दस्य नित्यत्वमुत अनित्यत्वम्?
5. शब्दः वर्णात्मक इति के वदन्ति?
6. अर्थापत्तिः कतिविधा?
7. बौद्धमते कति प्रमाणानि? कानि तानि?
8. भाट्टमते कति पदार्थाः? के ते?
9. स्त्रीणां वैदिककर्मसु कथमधिकारः?
10. भाट्टमते शाब्दबोधे मुख्यविशेष्यत्वं कस्य?
11. चित्रायागस्य फलविधिः कः?

**अथवा**

अनृतवदननिषेधबोधकं वचनं किम्?

12. न्यायमते शाब्दबोधे मुख्यविशेष्यत्वं कस्य?

**अथवा**

नैयायिकमते कति प्रमाणानि?

13. अङ्गानां किं फलम्?

**अथवा**

नित्याग्निहोत्रविधायकं वाक्यं किम्?

14. अभिक्रमणं कस्य अङ्गम्? किं प्रमाणम्?

**अथवा**

न्यायमते वेदस्य कर्ता कः?

15. वेदस्य पौरुषेयत्वसाधकानुमाने दृष्टान्तः कः?

**अथवा**

आरुण्यस्य क्रयभावनायां केन द्वारा अन्वयः?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. शब्दस्यार्थप्रत्यायकत्वं न सम्भवतीत्यत्र युक्तिः का? स्पष्टयत।

17. युगपत्छब्दस्य अनेकत्रोपलम्भे युक्तीः प्रदर्शयत।

**अथवा**

शब्दस्य क्षणिकत्वं निराकृत्य प्रत्यक्षत्वं समर्थयत।

18. वर्णानां क्षणभङ्गस्वरूपं खण्डयत।

**अथवा**

शब्दत्वजातौ प्रमाणं यथाग्रन्थं संगृह्य लिखत।

19. अभिहितान्वयवादस्य स्वरूपं विवृणुत।

20. वाक्यार्थबोधप्रकारे मतद्वयं संगृह्य लिखत।

**अथवा**

वेदापौरुषेयत्वं सप्रमाणं विवृणुत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. अर्थापत्तिः।

**अथवा**

विधिः।

# A-II/2/2411/ 22

## चतुर्थसत्रार्द्धम्

## द्वितीयपत्रम्

## मीमांसा

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. लिङ्गक्रमसमाख्याधिकरणे का सङ्गति: ?
2. आग्नेय्याधिकरणस्य संशयबीजं प्रदर्शयत।
3. भक्षाधिकरणविषयवाक्यार्थं वर्णयत।
4. 'इन्द्रपीतस्य' इत्यत्र समासं प्रदर्शयत।
5. 'सहैव दशभि: पुत्रै: भारं वहति गर्दभी' इमं वाक्यसन्दर्भं विवृणुत।

**अथवा**

त्रिंशदधिकरणसार: क: ?

6. उपदेशातिदेशौ कौ ?
7. वाक्यलक्षणं यथाग्रन्थमुपपादयत।
8. क: उपक्रमाधिकरणन्याय: ?

**अथवा**

'वेदो वा प्रायदर्शनात्' सूत्रार्थ: क: ?

9. गुणमुख्यव्यतिक्रमाधिकरणे क: विषय: ?
10. 'अङ्गबाहुल्येन प्रधानोत्पत्तिविधिनिर्णय:' ग्रन्थपङ्क्तिं व्याख्यात।
11. क्रमाधिकरणस्य विषयसंशयौ प्रदर्शयत।
12. तार्तीय: बाधं कथं विशिष्यते ?
13. द्वयो: लिङ्गयो: विरोध: कुत्र ?
14. सामर्थ्यं लिङ्गमिति मतं कस्य ?

**अथवा**

का नाम समाख्या ?

15. बलाबलाधिकरणसूत्रं लिखत।

**अथवा**

श्रुत्यादीनां विनियोगरीतिः का?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. समाख्यां प्रमाणं व्याख्यात।

17. इन्द्रपीताधिकरणसारांशं वर्णयत।

**अथवा**

गुणमुख्यव्यतिक्रमाधिकरणे वार्त्तिकमतं प्रदर्शयत।

18. प्रकरणाधिकरणमारचयत।

**अथवा**

सोदाहरणं लिङ्गवाक्यविरोधं व्याख्यात।

19. स्थानप्राबल्यं वर्णयत।

20. विनियोगविधिः निरूप्यताम्।

**अथवा**

प्रकृतग्रन्थभागस्य वैशिष्ट्यं प्रदर्शयत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. बलाबलाधिकरणं विमृशत।

**अथवा**

श्रुत्यादीनि प्रमाणानि विवेचयत।

# A-II/3/2412/ 22

## चतुर्थसत्रार्द्धम्

## तृतीयपत्रम्

## मीमांसा

**समय: घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. यज्ज्ञानादित्यादिग्रन्थारम्भपद्यं लिखत।
2. को नाम शाब्दबोधः?
3. वैयाकरणमते शाब्दबोधे मुख्यविशेष्यं किम्?
4. प्रथमाविभक्तेः कोऽर्थः?
5. जगतः कर्ता कृष्ण इत्यत्र षष्ठ्याः कोऽर्थः?
6. पुष्पेभ्यः स्पृहयतीति प्रयोगे चतुर्थीविधायकं सूत्रं किम्?
7. धारेरुत्तमर्ण इत्यस्य उदाहरणं लिखत।
8. सहयुक्तेऽप्रधाने इति सूत्रस्य कोऽर्थः?

**अथवा**

इत्थम्भूतलक्षणे इति सूत्रस्य कोऽर्थः?

9. अधिशीङ्स्थासां कर्म इत्यस्य उदाहरणानि दर्शयत।

**अथवा**

उपान्वध्याङ्वसः इत्यस्य उदाहरणानि दर्शयत।

10. तथायुक्तं चानीप्सितमित्यस्य किमुदाहरणम्?
11. गोदोहमास्ते इत्यत्र कथं द्वितीया?

**अथवा**

दुह्धातोः कोऽर्थः?

12. का नाम निरूढालक्षणा?
13. का नाम साम्प्रतिकीलक्षणा?

14. सविषयकधातुयोगे द्वितीयार्थः कः?

**अथवा**

ऐन्द्रं दधि इत्यत्र तद्धितस्य कोऽर्थः?

15. अधिकरणत्वे का विभक्तिः विधीयते?

**अथवा**

त्रिविधमधिकरणं दर्शयत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. सिद्धान्ते अखण्डोपाधिरूपं कर्मत्वं किमर्थं स्वीक्रियते इति उपपादयत।

17. कर्मत्वादिधर्मो द्वितीयाद्यर्थः न तु कर्मादिरूपो धर्मीति साधयत।

18. उभसर्वतसोः इत्यादिवार्तिकं सोदाहरणं लिखत।

**अथवा**

लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनव इति सूत्रम् उदाहरणेन व्याख्यात।

19. अकथितं च इति सूत्रं केषां धातूनां योगे प्रवर्तते? सोदाहरणं लिखत।

**अथवा**

प्रकृत्यादिभ्य उपसंख्यानमिति वार्तिकमुदाहरणैः व्याख्यात।

20. गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि इति सूत्रार्थं सोदाहरणं प्रतिपादयत।

**अथवा**

पञ्चमीविधायकसूत्रत्रयं सोदाहरणं व्याख्यात।

**स. प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. "सुपां कर्मादयोऽप्यर्थाः" इति कात्यायनवचनं विस्तरेण व्याख्यात।

**अथवा**

कर्मप्रवचनीयोगे द्वितीयां विविधैरुदाहरणैः निरूपयत।

# A-II/4/2413/ 22

## चतुर्थसत्रार्द्धम्

## चतुर्थपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

**अर्थविवरणं कुरुत।**

1. त्रिधातु।
2. दानम्।
3. उपवाजनम्।
4. उपावहरति।
5. अव्यन्तम्।
6. अभितरम्।
7. अप्रक्षिणन्
8. सम्भेदः।
9. विरोजनम्।
10. विक्षेपः।
11. ध्वानः।

**अथवा**

प्रयोगविधिः।

12. अध्ययनम्।

**अथवा**

अधिकारविधिः।

13. प्रकरणम्।

**अथवा**

संशिञ्जयति।

14. दर्शः।

**अथवा**

कल्पः।

15. यागः।

**अथवा**

सान्नाय्यम्।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. मध्यमं परिधिमुपस्पृश्योर्ध्वे आघारसमिधावादधाति। व्याख्यात।

17. अपरेण स्रुचः पुरोडाशावासादयति। विवृणुत।

18. अस्तु श्रौषडित्याग्नीध्रोऽपरेणोत्करं दक्षिणामुखस्तिष्ठन् स्फ्यं संमार्गांश्च धारयन् प्रत्याश्रावयति। इदं विवृणुत।

**अथवा**

अनपव्याहरन्तः प्रचरन्ति। त्रीन् यथर्षि मन्त्रकृतो वृणीते। व्याख्यात।

19. उत्तरार्धपूर्वार्धेऽग्नये जुहोति। दक्षिणार्धपूर्वार्धे सोमाय समं पूर्वेण। उभे ज्योतिष्मति। व्याख्यात।

**अथवा**

जुह्वामुपस्तीर्य सर्वेषां हविषामुत्तरार्धात्सकृत्सकृत् स्विष्टकृतेऽवद्यति द्विः पञ्चावत्तिनः। व्याख्यात।

20. अयासपत्नानिति सव्येनोपभृतं प्रतीचीं बर्हिर्वेदि निरसित्वा प्रोक्ष्यैनामभ्युदाहृत्य जुह्वा परिधीननक्ति, वसुभ्यस्त्वेति मध्यमं रुद्रेभ्यस्त्वेति दक्षिणमादित्येभ्यस्त्वेत्युत्तरम्। व्याख्यात।

**अथवा**

स्वर्गकामो दर्शपूर्णमासौ एककामः ताभ्यां यावज्जीवं यजेत। त्रिंशतं वा वर्षाणि। जीर्णो वा विरमेत्। व्याख्यात।

**स. एकस्य प्रबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. विधिः।

**अथवा**

वेदः।

# A-II/5/2414/ 22

## चतुर्थसत्रार्द्धम्

## पञ्चमपत्रम्

## मीमांसा

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. नामधेयत्वे निमित्तचतुष्टयं किम्?
2. को नाम अतिदेश:?
3. चातुर्मास्येषु चत्वारि पर्वाणि कानि?
4. प्रत्यक्षवचनातिदेशमुदाहरत।

**अथवा**

नामातिदेशमुदाहरत।

5. गौणीनिमित्तस्य भूम्न: उदाहरणं किम्?

**अथवा**

यजमान: प्रस्तर इत्यत्र गौणीनिमित्तं किम्?

6. शब्दभावनाया: साध्याकाङ्क्षायां किमन्वेति?
7. श्रौतीं परिसंख्यामुदाहरत।

**अथवा**

लाक्षणिकीं परिसंख्यामुदाहरत।

8. अग्नीषोमीयपशुयाग: कस्याङ्गम्?
9. ज्योतिष्टोमस्य अधिकारवाक्यं किम्?
10. ज्योतिष्टोमस्य उत्पत्तिवाक्यं किम्?
11. गुणविधिमुदाहरत।
12. का नाम प्रकृति:?

**अथवा**

का नाम विकृति:?

13. प्रकरणान्तरात् कर्मभेदमुदाहरत।

**अथवा**

गुणात् कर्मभेदमुदाहरत।

14. का नाम ज्ञातता?

15. भाट्टसंमताः पदार्थाः के?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. मत्वर्थलक्षणाभयात् कर्मनामत्वं साधयत।

**अथवा**

वाक्यभेदभयात् कर्मनामत्वं साधयत।

17. वेदस्य अपौरुषेयत्वं साधयत।

18. शब्दस्य नित्यत्वं साधयत।

19. आकृतेर्वाच्यत्वं साधयत।

**अथवा**

भावार्थाधिकरणमारचयत।

20. सोदाहरणं श्रुतिविरुद्धस्मृतेरप्रामाण्यं साधयत।

**अथवा**

अर्थवादानां प्रमाण्यं साधयत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. विधिरत्यन्तमप्राप्ते इत्यादिकारिकां विलिख्य व्याख्यात।

**अथवा**

पर्युदासाङ्गीकारे हेतुद्वयं सोदाहरणं व्याख्यात।